# तृतीयोऽङ्कः ।

(नेपथ्ये महान् कलकलः ।)

(ततः प्रविशत्यात्मना द्वितीयः क्रूराकृतिः क्रूरदंष्ट्रः ।)

(प्रविश्य ।)

**क्रूरदंष्ट्रः** - (विकृतं विहस्य । तुन्दं परिमृशन् ।) हन्त कृतकृत्योऽहं परितृप्तोऽहं परिपुष्टोऽहम् ।

**वज्रदंष्ट्रः** - तवानन्दस्य कारणं न जानामि ।

**क्रूरदंष्ट्रः** - अरे ईदृग्रौद्रमपि कारणं न जानासि ।

**वज्रदंष्ट्रः** - नहि नहि । नव्यक्षतजपललपरिप्लुतपुद्गलं त्वां पलायमानं परिपश्यन्नहमपि पलायितः ।

**क्रूरदंष्ट्रः** - सखे पूर्वमननुभूतं सङ्ग्रामाख्यं कुतूहलमद्यैवानुभूतम् ।

**वज्रदंष्ट्रः** - तत् कीदृशं तदपि न जानेऽहम् ।

**क्रूरदंष्ट्रः** - वैरविषकलुषितहृदया निर्दया वीराः परस्परं शस्त्रैः प्रहरन्ति ।

**वज्रदंष्ट्रः** - किं तदकारणमेवाभूत् ।

**क्रूरदंष्ट्रः** - न खलु गुरुतरं कारणं तस्य ।

**वज्रदंष्ट्रः** - तर्हि मामपि तदभिज्ञं कुरु ।

**क्रूरदंष्ट्रः** - शृणु । पुरा खलु प्रजाप्रवृद्धिप्रयत्नवता पितामहेन तदाधारभूता भूमिः परिकल्पिताऽभूत् ।

**वज्रदंष्ट्रः** - हुं ज्ञायते । ततस्ततः ।

**क्रूरदंष्ट्रः** - अनन्तरं जातुचित्सा निद्राविद्रावितावधानं जगन्निदानं द्रुहिणं द्रुतं मत्वा कुमारहिरण्याक्षेण महाराजहिरण्यकशिपुसहचरेणापहृता ।

**व्रजदंष्ट्रः** - आम् वर्त्तत एव । ततस्ततः ।

**क्रूरदंष्ट्रः** - पुनः साम्प्रतं तं जिहीर्षुः कोऽपि दिव्यमायामयः कोलः

स्वदंष्ट्रामलचन्द्रलेखाकोटौ कुमुदिनीमिव तामारोप्य रभसाज्जलाद्बहि-र्निरसरत् ।

**वज्रदंष्ट्रः** - (सविस्मयम् ।) किं साऽपहृतैव । ततस्ततः ।

**क्रूरदंष्ट्रः** - ततस्तौ तरस्विनौ रणकररणाभिलाषिणौ कुमारमहाराजौ तत्पश्चात् द्रुतौ ।

**वज्रदंष्ट्रः** - (सोत्साहम् ।) सा प्रत्यानीता ।

**क्रूरदंष्ट्रः** - नहि नहि । शृणु । ततः कुमारेण आर्य कूटकोलक्रथनायाऽहमेक एवाऽऽलम्भवान् स्वनिलयमलङ्करोतु इति महाराजः परावर्त्तितः ।

**वज्रदंष्ट्रः** - ततः किमभूत् ।

**क्रूरदंष्ट्रः** - ततो महाराजेन तत्साहाय्याय सम्प्रेषिता वीराः ।

**वज्रदंष्ट्रः** - ततः किं निष्पन्नम् ।

**क्रूरदंष्ट्रः** - ततः क्ष्वेडाक्ष्वेडच्छर्दननिपुणैर्वीरमहोरगैः सह कोलगरुत्मतः क्रूरतरः सङ्गरः समजनि हताश्च ते वीराः ।

**वज्रदंष्ट्रः** - अहह कष्टतरमेकेनैव निहताः सर्वे । ततस्ततः ।

**क्रूरदंष्ट्रः** - ततः कुमारेण स्वमायाप्रपञ्चः प्रपञ्चितः ।

**वज्रदंष्ट्रः** - (सहर्षनिश्चयम् ।) जितो वराहः । ततस्ततः ।

**क्रूरदंष्ट्रः** - तदनु दनुजारिप्रभावभास्करेण कुमारमायानीहारस्तिरस्कृतः ।

**वज्रदंष्ट्रः** - (साश्चर्यम् ।) ततस्ततः ।

**क्रूरदंष्ट्रः** - ततः कुमारो निजजननिधनशुष्केन्धनसन्धुक्षितक्रोधधनञ्जयदीप्ता-ङ्गाराभ्यां विलोचनाभ्यां निर्दहंस्तमेवमभाणीत् आः कालापसद तिष्ठ तिष्ठ क्व गच्छसि शार्दूलस्य पुरतः । ततश्चाह वराहः । (सस्मितम् ।) अरे ग्रामशार्दूल नाहं क्वापि गच्छामि स्थितोऽस्मि तवैव पुरः । एहि तावद्दर्शय स्वपौरुषम् । इति परस्परं वाक्कशाप्रहार-प्रवृद्धापराकसौवीरस्तम्बेरमौ रोमहर्षणं सम्प्रहारं पप्रथाते ।

**वज्रदंष्ट्रः** - ततस्ततः ।

**क्रूरदंष्ट्रः** - ततः परं प्रणतपद्मोद्भवप्रभृतिकृतस्तुतिप्रवृद्धसारः स्वघोणाघूत्करण-

घोषघोषिताशेषावकाशो घोरतरघोणीदात्रेण कर्कटिकाफलमिव द्रुततरं निर्दयः कुमारं दंष्ट्रया निर्ददार ।

**वज्रदंष्ट्रः** - (सखेदम् ।) अहह अनर्थोऽभूत् । ततस्ततः ।

**क्रूरदंष्ट्रः** - ततश्च जयशब्दनिरन्तरितं व्योमवलयं पुष्पासारनिबिडश्चाधः-प्रदेशस्तदासीत् ।

**वज्रदंष्ट्रः** - (पुनः सखेदम् ।) सखे पुनरस्मदीयानां किं वृत्तम् ।

**क्रूरदंष्ट्रः** - ततो युद्धावशेषाशेषा अस्मदीया वीरास्तूच्चण्डतया महाराजाय निवेदयितुं गताः । पश्चान्महाराजेन किं व्यवसितं तन्नजाने । अहं चोष्णजङ्घतयामुं प्रदेशं प्राप्तः ।

**वज्रदंष्ट्रः** - हन्त हन्त समग्रं व्यग्रताया एव कारणं शृणोमि नत्वानन्दस्य तत्कथय तन्निदानम् ।

**क्रूरदंष्ट्रः** - (किञ्चिद्विहस्य ।) शृणु । एकं त्वपूर्वकुतूहलदर्शनमेव कारणमन्यत्सङ्ग्रामसर्पिःसेकप्रवृद्धक्षुधोषर्बुधधैर्यविधुरेण मया व्यापादित-वीरविग्रहवृन्दान्तरितेन प्रत्यग्रं तदग्रमांसमव्यग्रं सङ्ग्रामस्थले समग्रं भुक्तं पीतं चोष्णं सलीलं कीलालं तेनालं तृप्तोऽस्मि । किञ्च मत्प्रारब्धोदयवशाद्गञ्जाधिपतिना दत्तं वीराणां पानार्थमानीतं मधुरतरमासवमपि पीतं तेन वासवसदृशोऽहम् । (इति मदस्खलनं नाटयति ।)

**वज्रदंष्ट्रः** - (सक्रोधम् ।) आः पाप घस्मरापसद स्वीयानां मांसं कोऽपि ग्लसते । (इति लत्ताप्रहारं नाटयति ।)

**क्रूरदंष्ट्रः** - (भूमौ लुठन्नेव मदस्खलिताक्षरम् ।) अरे रे बलात् प्रहर त्रुट्यति कटिः श्रमभरेण दिष्टवशादनर्घो दासस्त्वं संलब्धः ।

**वज्रदंष्ट्रः** - (पुनः सक्रोधम् । चपेटिकया प्रहरति ।)

**क्रूरदंष्ट्रः** - (सक्रोधमुत्थाय कचेषु धृत्वा वज्रदंष्ट्रं कर्षन् ।) अरे रे राण्डेयानायास-सम्प्राप्तं पिशितं कोऽपि पिशिताशनः परित्यजति । (इति परस्परं महान्तं कोलाहलं नाटयतः ।)

(नेपथ्ये ।)

**सङ्ग्रामोद्धतधीरवीरसमितिश्लाघ्यं हिरण्याक्षकं**
**द्वेषाद्द्रागदृणात्स सूकरवपुर्विष्णुर्विदित्वा तु तत् ।।**
**शोकोद्रेकसुचित्रभानुविपुलज्वालावलीढः स्वयं**
**क्रोधाडम्बरभृद्धिरण्यकशिपुः प्राप्तः स्वकीयैर्वृतः ।।१।।**

**उभौ** - (श्रुत्वा सातङ्कम् ।) अहह सम्प्राप्तश्चण्डो महाराजस्तेनेतो निर्गमनमेव श्रेयः । (इति निष्क्रान्तौ ।)

(प्रवेशकः ।)

(ततः प्रविशति यथानिर्दिष्टो विद्युद्दंष्ट्रेण मन्त्रिणाऽनुगम्यमानः खड्गपाणिर्हिरण्यकशिपुः ।)

(प्रविश्य ।)

**हिरण्यकशिपुः** - (सशोकावेगं सास्रम् । खड्गमभिवीक्ष्य ।)

**किं खड्गेन भिनद्म्यनेन हि निजं मस्तं पिबामि द्रुतं**
**क्ष्वेडं किं प्रपतामि गोत्रशिरसः किं साम्प्रतं मे क्षमम् ।।**
**जाग्रज्ज्वालजटालवह्निमथवाऽहं संप्रविश्याऽनृणी**
**किं मज्जामि महार्णवेऽहमधुना भ्रातुः सुशोकातुरः ।।२।।**

(इति मूर्च्छति ।)

**विद्युद्दंष्ट्रः** - महाराज समाश्वसिहि समाश्वसिहि । (इति पटान्तेन वीजयति ।)

**हिरण्यकशिपुः** - (समाश्वस्य ।) हा वत्स वीराग्रगण्य हा मद्भुजबलाधिदैव हा समररसरसिक क्वाऽसि दर्शय ते मुखम् । (इति पुनर्मूर्च्छितः पतति ।)

**विद्युद्दंष्ट्रः** - (उत्थाप्य ।) महाराज कोऽयमावेगः शोकस्य । नेदमुचितं भवादृशानाम् ।

**हिरण्यकशिपुः** - भद्र किमिदमभूत् ।

**किं त्रिलोकी निमग्नाऽब्धौ किं वा सूर्योऽथवा शशी ।।**
**किं वा भ्रातृविहीनोऽहं न जाने शोकमूर्च्छितः ।।३।।**

(क्षणं विमृश्य दीर्घमुष्णञ्च निःश्वस्य ।) अथवा नूनं भ्रातृविरहितोऽहम् । हा कुमार हा प्रतिवीर हा मदाज्ञानुवर्त्तिन् क्वाऽसि देहि मे प्रतिवचनम् ।

(इति पुनर्मूर्च्छितः पतति ।)

**विद्युद्दंष्ट्रः** - (वारिणा सिञ्च्वा उत्थाप्य च धवित्रेण वीजयति ।)

**हिरण्यकशिपुः** - (समाश्वस्य नेत्रे उद्घाटयति ।)

**विद्युद्दंष्ट्रः** - (स्वगतम् ।) अहो कीदृशीयमवस्था सम्पन्ना महाराजस्य । (प्रकाशम् ।) अयि महाराज भवत्सदृशानां वीरोत्तमानामिदं कार्पण्यं दूषणावहं न तु भूषणावहम् । पुनः पुनः किं ब्रवीम्यहं क्षोदीयान् ।

**हिरण्यकशिपुः** - (सधैर्यम् । क्षणं विचार्य ।) भद्र युक्तं भणसि यदस्मत्परिजनसदृशम् । यतः ।

**दुर्बला अश्रुपातेन देहपातेन वा पुनः ।।**
**प्रतिकुर्वन्ति दुःखं द्राक् शूराः शस्त्रै रणाङ्गणे ।।४।।**

**विद्युद्दंष्ट्रः** - प्रभो एवमेव ।

**हिरण्यकशिपुः** - (सक्रोधं खड्गमुद्यम्य ।) भो मन्त्रिन् शृणु ।

**विष्णुना रहितं नूनं करोम्यद्य जगत्त्रयम् ।।**
**चण्डदोर्दण्डवीर्यं तु दण्डपाणिसमं मम ।।५।।**

(इति वेगेनोत्तिष्ठति ।)

**विद्युद्दंष्ट्रः** - (सविनयम् ।) महाराज मर्षय मर्षय । जननीजनं वधूजनं चानाश्वास्य नायं गन्तुमवसरः ।

**हिरण्यकशिपुः** - भद्र किमाश्वासयामि मातरं वधूं च साम्प्रतमिदमेव समाश्वासनम् ।

**शत्रोर्निबर्हणं किं वा तद्धस्तान्मरणं रणे ।।**
**इह सौख्यकरं त्वेकमपरत्र द्वितीयकम् ।।६।।**

**विद्युद्दंष्ट्रः** - (सविचारम् ।) यन्मनीषितं देवस्य ।

(नेपथ्ये ।)

(समाश्वसिहि समाश्वसिहि भट्टिनि ।)

**हिरण्यकशिपुः** - (श्रुत्वा ।) अहह दुःखतरं मातृचरणानामागमनमिव प्रतिभाति ।

**विद्युद्दंष्ट्रः** - एवमेव ।

**हिरण्यकशिपुः** - ननु मन्त्रिन् ।

**भ्रात्रा सह मया नित्यं विधेयं पादवन्दनम् ।।**
**मातुस्तद्रहितः कष्टं करिष्ये तत्कथं वद ।।७।।**

(ततः प्रविशति चेट्याऽनुगम्यमाना दुःखार्त्ता देवी दितिः ।)

(प्रविश्य ।)

**दितिः** - हा पुत्र हा मातृवत्सल हा महावीर क्व प्रस्थितोऽसि देहि मे प्रतिवचनम् । (इति मूर्च्छिता पतति ।)

**हिरण्यकशिपुः** - (सहसोपसृत्य । उत्थाप्य । सकरुणम् ।) मातः समाश्वसिहि समाश्वसिहि ।

**दितिः** - (समाश्वस्य ।) हा वत्स मामनापृच्छ्य परलोकं गतः कथम् । मां मन्दभागिनीं त्यक्त्वा । मया किं ते विनाशितम् । (इति पुनर्मूर्च्छति ।)

**हिरण्यकशिपुः** - (तालवृन्तेन वीजयति ।)

**दितिः** - (समाश्वस्य । आकाशे लक्ष्यं बद्ध्वा ।)

**ह हा सोदर्यं ते सपदि जननीं मां परिजनं**
**घृणालो ते वक्त्रं सुभग मयि नित्यं सुखकरम् ।।**
**प्रदर्श्याग्रे कृत्वा तव विरहतप्तां झटिति मां**
**रुदन्तीं गन्तव्यो ह्यभिलषितलोको बलजितः ।।८।।**

(इति भूमौ मस्तकमास्फालयति ।)

**हिरण्यकशिपुः** - अम्ब अम्ब कोऽयमज्ञानस्यावेगः । (इति हस्तेन भालमभिमृशति ।)

**दितिः** - (दीर्घमुष्णं विनिःश्वस्य ।)

**मज्जठराकरनिभृतं रत्नं पुत्राख्यमेतदतिमूल्यम् ।।**
**हा दौर्भाग्यवशान्मेऽथ नीतं चोरेण मृत्युसंज्ञेन ।।९।।**

(इत्युरः कराभ्यां ताडयति ।)

**हिरण्यकशिपुः -** (तत्करौ धृत्वा ।) हन्त अम्ब अम्ब किं कर्तुं व्यवसिताऽसि । शृणु तावन्मद्वचनम् ।

**परिदेवनया ते मे किमागन्ताऽत्र पुत्रकः ॥**
**परलोकसुखं त्यक्त्वा वीराणामुचितं पुनः ॥१०॥**

**दितिः -** (अशृण्वती सर्वतोऽवलोक्य ।)

**किमर्कः प्रलयं प्राप्तः किं वेन्दुस्तारकान्वितः ॥**
**दिशः कवलिता ध्वान्तैर्यथाहं दुःखपन्नगैः ॥११॥**

(इत्युच्चैरोदिति ।)

**हिरण्यकशिपुः -** (स्वगतम् ।) हन्त निर्विण्णोऽहं कथमाश्वासयाम्येनाम् । (प्रकाशम् ।) अयि मातर्मैवं कृथाः । नोचितमेतद्वीरसुहृदाम् ।

**दितिः -** (सकरुणं सास्रम् ।) पुत्र पश्य पश्य ।

**वत्सस्मरणराकेन्दुक्षुब्धः शोकाख्यसागरः ॥**
**तरङ्गाडम्बरैर्दीनां प्लावयत्येष मां भृशम् ॥१२॥**

तत्किं करोमि ।

**हिरण्यकशिपुः -** अवधारय मातर्मम वचनम् ।

**स्मरणाज्यनिषेकेण शोकाग्निर्वर्द्धते बहु ॥**
**धैर्यवारिवशाच्छान्तो भवत्येष न संशयः ॥१३॥**

**दितिः -** (सास्रम् ।) सत्यं ब्रवीषि । परं

**शोकाम्बुनाव्यपूरेण नष्टो धैर्यमहीरुहः ॥**
**समूलस्तूलवत्क्षिप्तो दूरं चिन्ताह्ववायुना ॥१४॥**

(इति पुनरपि रोदिति ।)

**हिरण्यकशिपुः -** (आकाशे दत्तदृष्टिः ।) हन्त हन्त कीदृक्षोऽयं तेजःपुञ्जः प्रदृश्यते व्योमवलये ।

(सर्वेऽपि सविस्मयमूद्र्ध्वं पश्यन्ति ।)

**हिरण्यकशिपुः -** (ससंशयम् ।)

**दिव्यरूपधरः सोऽयं भ्राता मे समुपागतः ।।**
**किं वा ज्ञानघनः कश्चिच्छोकनाशाय साम्प्रतम् ।।१५।।**

(पुनर्निपुणं निर्वर्ण्य । सौत्सुक्यम् ।) हन्त ज्ञातः ज्ञातः । कृतार्थोऽहम् ।

**तडित्पिङ्गजटाभारमावहंश्च विपञ्चिकाम् ।।**
**सुरासुरनुतः साक्षाद्देवर्षिर्नारदाभिधः ।।१६।।**

(सर्वेऽपि श्रुत्वा सविस्मयं यथास्थानं तिष्ठन्ति ।)

(ततः प्रविशति यथानिर्दिष्टो नारदः ।)

(प्रविश्य ।)

**नारदः** - (अग्रतोऽवलोक्य ।) एष हिरण्यकशिपुः सशोकः सपरिवारस्तिष्ठति तदुपसर्पामि । (इति उपसर्पति ।)

**हिरण्यकशिपुः** - (उत्थाय प्राञ्जलिः प्रणमति ।)

**नारदः** - (सर्वानवलोक्य ।) किमिदं सर्वोऽपि जनः शोककलुषितः परिदृश्यते ।

(सर्वेऽपि सास्रास्तूष्णीं तिष्ठन्ति ।)

**हिरण्यकशिपुः** -

**देवर्षे मुग्धवत्पृच्छा दुनोति मम मानसम् ।।**
**करामलकवद्विश्वं यस्य ते ज्ञानगोचरम् ।।१७।।**

**नारदः** - (सस्मितम् ।)

**ज्ञानिनामग्रगण्यो यः कश्यपस्तस्य सम्मतः ।।**
**सुतस्त्वं किञ्च पत्न्येषा कोऽयं मोहस्य निर्भरः ।।१८।।**

**हिरण्यकशिपुः** - भगवन् सत्यमुक्तम् ।

**निवापाम्भस्तु शूराणां शत्रुकीलालमेव यत् ।।**
**तत्स्त्रीणां रोदनं तेषां भृशं सन्तोषकारणम् ।।१९।।**

परं किं करोमि ।

**कार्पण्यशोकमोहानां स्थानं नैसर्गिकं स्त्रियः ।।**
**शूराणामपि चेतांसि कुर्वन्त्येतादृशानि वै ।।२०।।**

**नारदः** - राजन्नुचिततरमुक्तम् । परं

**कापर्ण्यशोकमोहानां नाशकं ज्ञानमेव तत् ॥**
**बहूनामपि गोत्राणां यथा वज्रं दिवस्पतेः ॥२१॥**

**हिरण्यकशिपुः** - महर्षे एवमेव । परं

**दृढं तीक्ष्णं च युद्धार्हं शस्त्रं यद्यपि विद्यते ॥**
**तथापि वध्यशूराभ्यां रहितं त्वप्रयोजकम् ॥२२॥**

अतो भवादृशानां साहाय्यस्यायमेवावसरः ।

**नारदः** - (सस्मितम् ।) राजन् सौत्सुक्योऽहं । (सर्वानवलोक्य ।)

**आविर्भावतिरोभावशालिन्यस्मिन् प्रपञ्चके ॥**
**कस्य नाशो जनिः कस्य सुखदुःखे कुतस्तराम् ॥२३॥**

**इति ज्ञानासिनाच्छेद्याः शोकमोहादिवैरिणः ॥**
**आत्मानन्दोच्चसाम्राज्यप्राप्तिस्तस्मादसंशयः ॥२४॥**

**दितिः** - भगवन्ननुगृहीताः सर्वेऽपि ज्ञानामृतसेकेन । परं

**पुत्रस्नेहेन सुस्निग्धं हृदयं प्रस्तरोपमम् ॥**
**नार्द्रीकरोति मे नूनं ज्ञानामृतमिदं प्रभो ॥२५॥**

**नारदः** - (स्वगतम् ।) अहो प्रबलतरः पुत्रशोकपवमानः प्राप्तमपि ज्ञानपीयूषासारं दूरं प्रक्षिपति । (क्षणं विमृश्य ।) भवतु केनापि प्रकारेण दूरीकरोमि शोकपङ्कम् । (प्रकाशम् ।) राजन् पश्य पश्य । किमिदमस्ति गगनाङ्गणे ।

(सर्वेऽपि सविस्मयमूद्ध्र्वमवलोकयन्ति ।)

**हिरण्यकशिपुः** - (सहर्षौत्सुक्यमुत्थायाङ्गुल्या निर्दिश्य ।)

**अम्बाम्बायं मम भ्राता विमानेनार्कवर्चसा ॥**
**शौर्यवीर्यार्जितं लोकं प्रयात्यानन्दनिर्भरः ॥२६॥**

**दितिः** - (सहर्षौत्सुक्यमुत्थायाङ्गुल्या निर्दिश्य ।) एष एष मम पुत्रकः ।

**नारदः** - अलं दर्शनेन । (इत्यन्तर्हितं विमानम् ।)

**दितिः** - (सकरुणम् ।) हा वत्स परलोकसुखं स्वयमेवानुभवता भवता कथमहं परित्यक्ता ।

**नारदः** - हन्त अद्यापि शोकावेगः ।

**दितिः** - (सलज्जं सकरुणं तूष्णीं तिष्ठति ।)

**नारदः** - अयि पतिव्रते ।

**पतिव्रतानां सौख्याब्धिः पत्युः पादनिषेवणम् ॥**
**दुःखोदर्कञ्च तत्सर्वं यत्तेन परिवर्जितम् ॥२७॥**

**दितिः** - भगवन्नेवमेव ।

**नारदः** - (स्वगतम् ।) अयेऽद्यापि मोहलेशोऽस्तीति प्रतिभाति । (प्रकाशम्) अये देवि प्रपञ्चस्वरूपं तु श्रुतपूर्वम् । पुनर्जीवसंसारस्वरूप-विचारकस्तूरिकासलिलसेकेन क्षालय मोहलशुनदौर्गन्ध्यम् ।

**दितिः** - मुने तयोः स्वरूपं न जानामि ।

**नारदः** - शृणु तावत् ।

**जीवो नित्योऽणुरेवायं गुणेनाथ विसर्पिणा ॥**
**चैतन्येन युतः शश्वद्यथा गन्धेन चन्दनः ॥२८॥**

किञ्च ।

**अहन्ताममतारूपः संसारोऽज्ञानमूलकः ॥**
**स एव ज्ञाननाश्योऽस्ति प्रपञ्चो न सदात्मकः ॥२९॥**

**दितिः** - (सधैर्यम् ।) ज्ञानगुरो ध्वस्तमोहध्वान्ताऽस्मि । (इति मुनेः पादयोः पतति ।)

**नारदः** - (हस्तमुदस्य ।) ज्ञानवृद्धिरस्तु ।

**हिरण्यकशिपुः** - (सविनयम् ।) महर्षे मोहवेशन्तपङ्कमग्नाः सर्वे समुद्धृता भवता । (इति प्रणमति ।)

**नारदः** - विजयी भव ।

**हिरण्यकशिपुः** - तथास्तु ।

**नारदः** - राजन् गच्छामि स्वाश्रमम् ।

(इति श्रुत्वा सर्वे प्राञ्जलय उत्तिष्ठन्ति ।)

**हिरण्यकशिपुः** - यथा गुरोर्मनीषितं परं शीघ्रमेव पुनर्दर्शनानुग्रहः कार्यः ।

**नारदः** - तथा । (इति निष्क्रान्तः ।)

(नेपथ्ये ताम्रचूडध्वनिः ।)

**हिरण्यकशिपुः** - (श्रुत्वा ।) किं विभातैव विभावरी । (सर्वतोऽवलोक्य ।) एवमेव । यतः । जनानाम् ।

**निद्राभङ्गकषायितानि नयनान्याकुञ्चितान्यादितो**
**दीपार्चिर्मलिनाऽभवत् पुनरियं मुक्तावली शीतला ॥**
**मन्मोहान्धमिवान्धकारपटलं पद्मावलीभिः समं**
**शोकः कोकपतत्रिणोऽपि बहुधा दीर्णं नु सौरैः करैः ॥३०॥**

अथवा ।

**भ्रान्तो यामचतुष्टयं निशि शशी मद्रागकाङ्क्षान्वितः**
**सोऽयं जीवपरिग्रहेऽतिनिरतः प्राचीमरागां हिमाम् ॥**
**मत्वा क्षारमहार्णवे निपतितः सत्यं ब्रवीमीति सा**
**तप्तं गोलकमादधाति नियतं दिव्यं न देवो रविः ॥३१॥**

किञ्च ।

**तारोडुपसंयुक्ते तच्छ्रीजनके निशोदधौ पीते ॥**
**मिहिरागस्त्येन करैः कैरवमीनास्तु दीनतां प्राप्ताः ॥३२॥**

**दितिः** - वत्स एवमेव ।

**हिरण्यकशिपुः** - अम्ब तर्हि वधूजनसमाश्वासनाय कालोचितक्रियानिर्वर्त्तनाय च स्वनिलयमशून्यं करोतु तत्रभवती ।

**दितिः** - तथा (इति निष्क्रान्ता ।)

**हिरण्यकशिपुः** - (सविचारम् ।) भद्र विद्युद्दंष्ट्र किमधुना विधातव्यम् ।

**विद्युद्दंष्ट्रः** - (सविनयम् ।) यद्रोचते महाराजाय ।

**हिरण्यकशिपुः** - भद्र

**नित्यं शत्रुविनाशाय स्वेष्टप्राप्त्यै विचक्षणैः ।।**
**प्रयत्न एव कर्त्तव्यः किञ्च राज्ञा विशेषतः ।।३३।।**

**विद्युद्दंष्ट्रः** - इयमेव रीती राजकुलस्य यदादिशति देवः ।

**हिरण्यकशिपुः** - (चिरं विचार्य ।) भद्र एतदंशे गुरुचरणा एव शरणम् ।

**विद्युद्दंष्ट्रः** - (सनिश्चयम् । सौत्सुक्यम् ।) एवमेव ।

**हिरण्यकशिपुः** - कः कोऽत्र भोः ।

(प्रविश्य ।)

**दौवारिकः** - जयतु जयतु भट्टारकः । को नियोगः ।

**हिरण्यकशिपुः** - मन्निदेशाद्विज्ञापनीया गुरवः शीघ्रं दर्शनाय ।

**दौवारिकः** - देवादेशः प्रमाणम् । (इति निष्क्रम्य क्षणान्तरेण पुनः प्रविश्य ।) जयतु जयतु देवः । इदानीन्तनं कर्म निर्वर्त्य सत्वरमागच्छन्ति गुरुचरणाः । (इति निष्क्रान्तः ।)

(ततः प्रविशतः शुक्रशिष्यौ खरमेढ्राजमेढ्रनामानौ ।)

(प्रविश्य ।)

**खरमेढ्रः** - वयस्याजमेढ्र गुरुचरणानुज्ञयाहं पुनश्चलितो महाराजहिरण्यकशिपो राजधानीं पुनस्त्वं कथमागतः ।

**अजमेढ्रः** - अयि वयस्य खरमेढ्र नगरकुतूहलावलोकनाय ।

**खरमेढ्रः** - भवतु एहि । (पदान्तरे गत्वा ।) इयं राजधानी इदं गोपुरं तावत् प्रविशाव । (इति नाट्येन प्रविशतः ।)

(प्रविश्य ।)

**अजमेढ्रः** - (दुर्गोपकण्ठनिबद्धं स्तम्बेरममभिवीक्ष्य ।) वयस्य पश्य पश्य । निर्वाणाङ्गारमेचकः शिखरिशिखरोपमः कोऽयं द्विपुच्छः पशुः ।

**खरमेढ्रः** - रे अनभिज्ञ असौ करी ।

**अजमेढ्रः** - अरे वयं सर्वेऽपि करिणः परमस्य जातेरभिधानं किम् ।

**खरमेढ्रः** - करीति पूर्वमेवोक्तं नानुसन्धत्से नागरिकैः करीति व्यवह्रियतेऽयं पशुः ।

**अजमेढ्रः** - (विहस्य ।) अहो पौराणां विपरीता रीतिर्यत्कराभाववति करीति व्यवहार एषां नास्मासु ।

**खरमेढ्रः** - अरे दिवान्ध करं न पश्यसि । अग्रे स्थूलः करः तेन करीति व्यवहारः । पश्चात्कृशतरं पुच्छम् ।

**अजमेढ्रः** - आम् एवमस्ति । (पुनर्निपुणं निरूप्य ।) अहह धवलतीक्ष्णदण्डद्वयाघातेन केनापि निर्घृणेन प्रवेशितं वक्त्रं बृहदुदरदरीं तेनैवास्यग्रीवाऽपि नो दरीदृश्यते ।

**खरमेढ्रः** - हन्त पुरुषपशो इदं दन्तद्वयं न तु दण्डद्वयम् ।

**अजमेढ्रः** - तर्हि सम्यक् । (पुनः पश्चादवलोक्य । साश्चर्यम् ।) सखे पश्य पश्य । गिलितान्मोदकानखण्डानेवोद्गिरति पायुकुहरात् ।

**खरमेढ्रः** - (बहुतरं विहस्य ।) अरे एह्यलं निरीक्षणेन । (इत्यग्रतश्चलति । किञ्चिदन्तरं गत्वा ।)

**अजमेढ्रः** - (रथशिबिकादीन्यवलोक्य ।) वयस्य पश्य पश्य । भूमावपि विमानानि सन्ति ।

**खरमेढ्रः** - अरे नहि नहि । इमानि रथशिबिकाप्रभृतीनि वाहनानि तान्यारोहन्ति राजानो धनिकाश्च ।

**अजमेढ्रः** - (सानन्दम् ।) अनुत्तमोऽयं देशः यत्रेदृशान्युपकरणानि महार्हाणि । (पुनरग्रतो गत्वा । अश्वीयमवलोक्य ।) सखे अवलोकय अवलोकय स्वलङ्कृतानां महतां चक्रीवतां चक्रम् ।

**खरमेढ्रः** - अरे किं भ्रान्तोऽसि पश्यैते अश्वाः ।

**अजमेढ्रः** - (साश्चर्यम् ।) हुं किमेते मेध्या अश्वमेधीयाः पशवः । अत्र यष्टारो बहवो भवेयुश्चेत्परिपूर्णा अस्माकं मनोरथा दक्षिणया भोजनैश्च परिपुष्टाः स्मः ।

**खरमेढ्रः** - अरे अरण्यपशो स्वल्पं जल्प नह्येभिः पशुभिर्यजन्ते किन्त्वेनानारोहन्ति शीघ्रगमनाय ।

**अजमेढ्रः** - (सक्षोभम् ।) हन्त दुर्भगा एते पौरलोका यद्बहून्मेध्यान्पशूंल्लब्ध्वापि न यजन्ते यज्ञनारायणम् । (पुनः किञ्चित्प्रदेशान्तरं गत्वा । पदातिवृन्दमभिवीक्ष्य ।)

**अजमेढ्रः** - प्रिय सखे क्व पुनरेते गच्छन्ति बृहद्दात्रधारिणो मनुजाः ।

**खरमेढ्रः** - अरे अबुद्ध्वा किमिदं प्रलपसि एते राजभटाः सन्त्यसिपाणयः ।

**अजमेढ्रः** - हुम् एवं चेत्तर्ह्यसिना घासं कृन्तते शाकं वा ।

**खरमेढ्रः** - (सोपहासम् ।) भवतो यथोचितं प्रश्नः । रे वैधेय असेः प्रयोजनं शत्रुहनने ।

**अजमेढ्रः** - शत्रवो मनुष्या वा जात्यन्तरम् ।

**खरमेढ्रः** - (सन्यक्कारम् ।) अरे मनुष्या एव भक्षितं पृच्छया शिरः ।

**अजमेढ्रः** - हन्त हन्त । दुष्टतरोऽयं देशः यत्रत्यैर्निर्घृणैर्निहन्यन्ते मनुष्याः । (इत्याश्रमाय पुनर्गन्तुं परिवर्त्तते ।)

**खरमेढ्रः** - (सत्वरम् । शिखायां कौपीने च धृत्वाऽऽकृष्य परिवर्त्तयति । पुनरन्यतो गत्वा दौवारिकमवलोक्य ।)

**अजमेढ्रः** - वयस्य पश्य पश्य गुरुचरणान्नेतुमागतो यः स एवाऽयं वेत्रधरः ।

**खरमेढ्रः** - (अवलोक्य ।) हुं स एव । (उच्चस्वरेण ।) भद्र दौवारिक इत इतः ।

**दौवारिकः** - (उपसृत्य ।) कौ युवाम् ।

**खरमेढ्रः** - भद्र आवां शुक्राचार्यशिष्यौ गुरुचरणैः कर्मसमाप्तौ विलम्बं विज्ञाय पूर्वं वृत्तान्तपरिज्ञानाय प्रेषितौ स्वस्तत्प्रापय राजान्तिकम् ।

**दौवारिकः** - (स्वगतम् ।) एतौ बालौ किं करिष्येते महाराजान्तिक इति निवर्तयाम्येतौ । (प्रकाशम् ।) नहि तत्र गन्तुं युवयोरवसरस्तद्गच्छतं स्वाश्रमं सत्वरं सम्प्रेषणीया गुरुचरणाः ।

**खरमेढ्रः** - भद्र किमिदमद्य गन्तुं नावसरः ।

**दौवारिकः** - (स्वल्पस्वरेण तत्कर्णे कथयति ।)

**खरमेढ्रः** - हुं हुं बुद्धम् । गुरुचरणानेव प्रेषयावः । (इत्युभौ परावर्त्तेते ।)

(किञ्चिदन्तरं गत्वा ।)

**अजमेढ्रः** - वयस्य किमनेन स्वल्पं जल्पितं त्वत्कर्णाभ्यर्णे ।

**खरमेढ्रः** - (अपवार्य ।) भ्रातृशोकपरिप्लुतो महाराज इति तदावाभ्यां गत्वा तत्र किं करणीयम् ।

**अजमेढ्रः** - वयस्यास्य भ्राता केन कारणेन केन निहतः ।

**खरमेढ्रः** - पृथ्वीं जिहीर्षुणा श्रीमद्विष्णुना ।

**अजमेढ्रः** - सखे स कीदृश आसीत् अयं च कीदृशः ।

**खरमेढ्रः** - (अपवार्य ।) उभावपि दुष्टतरौ ।

**अजमेढ्रः** - हुम् एवं चेदेनमपि हनिष्यति विष्णुः कृपाकूपारः ।

**खरमेढ्रः** - (ससम्भ्रमं स्वकरतलेन तस्य मुखं पिधाय ।) अरे रे जाल्म मैवं सङ्गदीर्यदि तदीयेन केनापि श्रूयेत तर्हि हन्यादावाम् ।

**अजमेढ्रः** - (स्वकराभ्यां स्वनितम्बौ ताडयन् ।) हीहीही महती ते भीतिस्तत्परिजनात् । यद्यावां हनिष्यति चेत्तयोः श्राद्धे घृतश्च्युतो मोदकान् कः पुनर्भक्षिष्यति ।

**खरमेढ्रः** - (किञ्चित्सक्रोधम् ।) अद्मराधम अन्ये ब्राह्मणा न सन्ति ।

**अजमेढ्रः** - चेदावां दाक्षिणात्यानां दीक्षितानां च श्मश्रूणीव निष्प्रयोजनकौ ।

**खरमेढ्रः** - अलमलं भषणेन एहि तावद् गुरुचरणान् प्रेषयावः ।

(इति निष्क्रान्तौ ।)

(ततः प्रविशति गुरुः शुक्रः ।)

(प्रविश्य ।)

**शुक्रः** - अहो दृष्टिपथवर्त्तिनीयं राजधानी । या खलु

**क्षीराम्भोधिप्रमाथद्रुततरविततोत्तुङ्गडिण्डीरवृन्द-**
**भ्रान्तिं सम्पादयद्भिर्विमलशशिदृषन्निर्मितैः सौधसङ्घैः ।।**
**नेत्रानन्दं दिशद्भिर्विपुलतरमहो पौरवर्गैर्मनोज्ञा**
**किञ्च स्वीयश्रियेयं हसति सुरपुरं काश्यपेनाभिगुप्ताम् ।।३४।।**

(पुरतो गत्वा ।) अयं नन्द्यावर्त्तः तत्प्रविशामः । (इति प्रवेशं नाटयति । पदान्तरं गत्वा ।) अयं हिरण्यकशिपुः । (इत्युपसर्पति ।)

**हिरण्यकशिपुः -** (अवलोक्य सास्रः सहसा पादयोर्निपतति ।)

**गुरुः -** वत्स उत्तिष्ठ उत्तिष्ठ । विजयी भव ।

**हिरण्यकशिपुः -** (उत्थाय साञ्जलिः सास्रस्तूष्णीं तिष्ठति ।)

**गुरुः -** अयि वत्स वीरभ्रातुरसदृशोऽयं शोकः ।

**हिरण्यकशिपुः -** भगवन् किं करोमि ।

**पुत्रेण रहितः पूर्वं भ्रात्रा हीनश्च साम्प्रतम् ।।**
**अतः किं जीवितेनापि श्रिया राज्येन वा बलैः ।।३५।।**

अतः करणीयान्यनुजानन्तु गुरुचरणाः ।

**गुरुः -** वत्स किं ते करणीयम् ।

**हिरण्यकशिपुः -** भ्रातृसविधे गमनम् ।

**गुरुः -** वत्स कृत्यमिदं ते कार्पण्यम् ।

**कातर्यं राजसिंहानां शूराणां ज्ञानिनां पुनः ।।**
**दूषणावहमत्यन्तं यथेन्दोर्मृगलाञ्छनम् ।।३६।।**

अतः शूरेण प्रयत्नवता भाव्यम् ।

**हिरण्यकशिपुः -** यथा गुरुपादानामाज्ञा । ("**विष्णुने**"ति पुनः पठति ।)

**गुरुः -** वत्स नायं सहसा संरम्भस्यापि समयः । यतः ।

**बलैः परिजनैर्भूत्या समृद्धेनापि तत्त्वतः ।।**
**विचार्य कार्यं कर्त्तव्यं देशकालौ बलाबले ।।३७।।**

**हिरण्यकशिपुः -** एवं चेद्भगवन् मया किं कार्यम् ।

**गुरुः -**

**तपसा तोषयित्वा द्राक् द्रुहिणं दुष्करेण तम् ।।**
**दुष्प्रापाँस्त्वं वराँल्लब्ध्वा त्रिलोकीविजयी भव ।।३८।।**

**हिरण्यकशिपुः -** (कपोतहस्तं कृत्वा ।) यथा गुरुपादानामाज्ञा ।

(इति निष्क्रान्ताः सर्वे ।)

**।। इति श्रीनृसिंहविजयनाम्नि नाटके तृतीयोऽङ्कः ।।**